नं० ४३२२ — ब

तंत्रचूड़ामणि प्रथमाध्याय

प्रथमपादः

पत्राणि - ११

नं० ४३२२–

तंत्रचूडामणि प्रथमाध्याय प्रथमपादः

नं० ४३२२ – घ

पत्राणि ११

॥ ॥ माहात्म्ये ॥ ॥ तादृशसर्वसाधनानुकूला द्रव्यक्रियागुणा एव धर्माः स्वर्गातीन्द्रियः। द्रव्यादेरैन्द्रियकत्वेपि श्रेयः
साधनत्वरूपो यः हि तस्य धर्मत्वेन तादृशरूपस्यैन्द्रियागोचरत्वात् तदातूर्न ... दा। ॥ द्रव्यक्रिया
गुणादीनां धर्मत्वं कल्पयिष्यते ॥ तेषामैन्द्रियकत्वेपि न तादृशरूपेण धर्मत्वं ॥ श्रेयःसाधनताया
श्चानित्यं वेदात् प्रतीयते ॥ तादृशरूपेण च धर्मत्वं तस्मान्नेन्द्रियगोचरमिति ॥ तस्मात् द्रव्यादिरेव
धर्मपदार्थः • जैमिनिरप्यसूत्रयत् । चोदनालक्षणोर्थो धर्म इति चोदनेति वैदिकवाक्यनिष्ठो
विधिः यथा कुर्यात् क्रियेत कार्यः ॥ प्रवर्त्तेहमिति ज्ञानं येन शब्देन जन्यते ॥ स चोदनोच्यते तत्राद्य
प्रवर्त्तनफलाभाति रिति ॥ तल्लक्षणः तद्विषयः एतेन घटं कुर्वीत्यादि लौकिकवाक्यविष
यव्युदासः अर्थो बलवदनिष्टाननुबन्धीष्टसाधनं तेनानर्थफल (ते) लानां श्येनादीनां न धर्म
त्वं श्येनादेर्हिंसाफलकत्वात् । हिंसायाश्च न हिंस्यादिति निषेधविषयत्वेनानर्थत्वात् अग्नीषोमी
यपशुहिंसायास्तु वैधत्वेन निषेधाविषयत्वात् नानर्थ इति नाव्याप्तिः एवञ्च विधिविषयो धर्मः
निषेधविषयश्चाधर्म इति उक्तं भवति • अदृष्टकाः कर्त्तव्यादृश्य इष्टकारव्यस्य तद्विषयायाः कर्त्त
ध३ व्यतायाश्च विधिविषयत्वेन धर्मत्वे ब्राह्मणो न हन्तव्य इति ब्राह्मणवधस्यापि निषेधविषयतया
धर्मत्वापत्तिरिति तत्त्वं ॥ ॥ यत्तु दृष्टानपेक्षशिष्टानुष्ठितं कर्म धर्म इति नव्यानां लक्षणं तत्रा
हननाभिचाराद्यादौ निषेधेऽतिव्याप्ते ... पुत्रेष्ट्यादिकर्मण्यव्याप्तमित्युपेक्ष्यं ॥ ॥

॥ ॥श्रीगणेशायनमः॥ ॥श्रीकुमारिलायनमः॥ ॥वेदोनादिर्यस्यनिश्वासस्ततःपश्चात्मा निर्मितोयस्यजातः॥
धर्मश्शास्त्रोद्धृतिर्यस्य हृत्तः सिंहास्योसौवात्मेस्तात्कृपातः॥१॥ निगमार्थविलासिकर्मणोमुनये जैमिनयेस्वसूत्रिणे॥ शा
बरायचभाष्यकारिणे नमइष्टायकुमारिलात्मने॥२॥ वेदेश्वरो यो दैवमीमांसासंगमेश्वरे॥ कोटीशर्मा विभोवास्सु
रागास्तंनंगुरुं॥३॥ श्रुतिस्मृतिसदाचारप्रमाणप्रमितात्मने॥ बोधायधर्मतत्त्वस्यमीमांसार्थः प्रदर्शयति॥४॥ ॥वेदे
नावद ऋग्यजुःसामात्मा विध्यर्थवादमंत्रनामधेयशालिना॥ तत्सांगस्वावितत्वः प्रत्यक्षानुमेयविभागावि
भिन्नःस्वरूपेणापि ज्ञातः तद्वृत्तिष्टहस्पति प्रभृतीनामगवगाह्यः तदर्थस्यतु विना विचारेण कोपिपार्थस्यानः प्रा
श्री॥ माण्यञ्चास्यपेसवधि स्यप्रशाक्यनिक्षाः शाक्यमुखाश्रपापिनो विवदंते ततः प्रामाण्यपुनःस्वतंतदर्थज्ञानायमीमां
सांशास्त्रंप्रवृत्तं तच्चानेकनिर्मितकमनेकप्रस्थानकमतिगहनानेकन्यायपरिशोधितं अधुना तनजनमनसो श्री॥
१ मनागप्यगोचरं॥ जैमिनिःसूत्रकर्त्ता ॥अल्पाक्षरमसंदिग्धंसारवद्विश्वतोमुखं॥ अस्तोभमनव
द्यंचसूत्रंसूत्रविदो विदुरितिसूत्रलक्षणं॥ नत्सूत्राणांव्याकर्त्ता स्वामीशबरो भाष्यकारः॥ सूत्रार्थो १
वर्ण्यतेयत्रवाक्यैःसूत्रानुकारिभिः॥ स्वपदानिचवर्ण्यंते भाष्यंभाष्यविदोविदुरितिभाष्यलक्षणं॥
भगवानुपवर्षोवृत्तिकारः॥ भट्टकुमारिलस्वामी तद्भाष्यस्यवार्त्तिककारः॥ उक्तानुक्तदुरुक्तानां चिंताय
त्रप्रवर्त्तते॥ तं ग्रंथंवार्त्तिकंप्राहुर्वार्त्तिकज्ञाविपश्चितइतिवार्त्तिकलक्षणं॥ वार्त्तिकेपंचप्रस्थानं॥ तत्रै
काविस्तृतार्थबृहट्टीका। अपरासंक्षिप्तामध्यमटीका। अन्यासंक्षिप्ततराकाशिका। परासंक्षिप्ततमार्त्ते
त्रवार्त्तिकपर्यायातंत्रटीका॥ ततोतिसंक्षिप्तातंत्रमूलपर्यायाटुपटीका॥ काशिकादौवार्त्तिकेचभवदेवोबक
पार्थसारथिप्रभाकरायणकारणपरितोषप्रभृतयष्टीकाकाराः॥ ॥ एवमस्मिन्महाशास्त्रे दुरवगाह्यविग्रहे॥ सु

सोमेश्वर १

ग्रहेकत्तुमस्यार्थसंग्रहोयं वितन्यते॥ आकाल्पमात्मनः शास्त्रं तत्सुपरीक्ष्य परीक्षकैः॥ आकाल्पमाकल्प्यता
मेषास्तेजश्चूडामणिर्बुधैः॥ भाष्यतोतातितानाकूलसंगतोर्थः श्रुतेरिह॥ सुप्रौढो विस्तरापोढः सूत्रारूढः प्रदर्श्य
ते॥ ॥ तत्रास्यां मीमांसायां सहस्रमधिकरणानि॥ अध्यायाश्च द्वादशलक्षणपर्यायाः॥ तेषु तृतीयषष्ठद
शमा अष्टचरणाः॥ तत्रोत्तमत्यचरणचतुष्टयं मीमांसकैः क्षुद्रं न व्याख्यायते॥ इतरे नवाध्यायाश्चतुश्चरणाः॥
एवमेषा सहस्राधिकरणा द्वादशलक्षणा॥ तत्राद्यं प्रमाणलक्षणं॥ द्वितीयं भेदलक्षणं॥ तृतीयं शेषलक्षणं॥
चतुर्थं प्रयोजकाप्रयोजकलक्षणं॥ पंचमं क्रमलक्षणं॥ षष्ठमधिकारलक्षणं॥ सप्तमं सामान्यातिदेश
लक्षणं॥ अष्टमं विशेषातिदेशलक्षणं॥ नवममूहलक्षणं॥ दशमं बाधाभ्युच्चयलक्षणं॥ एकादशं तन्त्रा
वापलक्षणं॥ द्वादशं प्रसंगलक्षणमिति विभागः॥ ननु चास्य शास्त्रस्य प्रवृत्तौ किं निमित्तं॥ अवधत्स्व तत्रा
स्वमुखे श्रद्धत्स्व मीमांसा हृदयं। इह हि सकलपुरुषार्थहेतावाम्नाये यज्ञो विशिष्टजलसमुत्पन्नम
द्य गर्भाधानाद्यनिन्द्यायनालिनमुपनीतं त्रैवर्णिकमधिकृत्य श्रूयते। अष्टवर्षं ब्राह्मणमुपनयीत तमध्या
पयीतेति अध्ययनविधिः॥ ननु च णिचः श्रवणान्न परत्र(?)मोध्ययनविधिः। सत्यं अष्टवर्षं तयाश्च(?)
भुः पुनः शुभलाकाथिना पित्रैवानुज्ञास्य इत्यात्रायोस्य वचनस्य॥ वस्तुतस्तु॥ ब्रह्मचार्युपाकृत्याधीयी
तेति स्मरणात् आचार्याधीनो वेदमधीष्वेति प्रैषाच्च। अध्ययनविधिरेवार्यं। अनोष्टवर्षो ब्रा● ह्मण
उपगच्छेत् सोधीयीतेति तस्यार्थः। स्वाध्यायोध्येतव्य इति तु स्पष्टोध्ययनविधिः॥ तव्यस्य विधौ स्मरणा
त्। विधिश्च लिङ्लोट्तव्यपंचमलकारानुवर्त्तिनी पुरुषप्रवृत्तिसंबंधबोधार्थवादात्मकफलकरणेति
कर्त्तव्यतांशत्रयवती लिङादिशब्दव्यापाररूपा तद्वाच्या प्रेरणापरपर्याया शाब्दीभावनोच्यते॥ तस्याश्च

त्यर्थात्मिका

विषयतज्ञाव्यतामापन्नासर्वधात्वर्थसामान्यरूपासमस्ताख्यातानुवर्त्तिनीकर्तोतिसमानाधिकरणा पुरुष
व्यापारूपा प्रयत्नपर्यायास्वर्गादिफलकरणेतिकर्तव्यतात्रयवती प्रत्ययवाच्यासमाक्षिप्तकर्तृ
काऽर्थभावनोच्यते । तत्रास्या स्वाध्यायाध्ययनभावनायां किं भाव्यमित्यपेक्ष्यते । कामिपदोपबंधाभा
वात् रात्रिसत्रवत् आर्थवादिकफलान्वेषणायां घृतकुल्या यथर्थवादानां ब्रह्मयज्ञाध्ययनप्रकर
णपरिपठितत्वात् तस्योक्तो बेधुनि तिवज्जाति देनिकवचनाभावात् ग्रहणाध्ययनविधिवाक्यशेषत्वाभा
वात् विश्वजिन्न्यायेन स्वर्गकल्प[illegible]माने दृष्टेसत्यदृष्टकल्पनानन्याय्येति दृष्टकस्मिंश्चिदन्विष्य
श्रौ: माणे समानप्रत्ययोपात्तकर्मो हतः स्वाध्यायोध्ययनवदपुरुषार्थत्वात् उत्तरक्रतुविध्यपरिगृहीत
त्वाच्च न भाव्याकांक्षां पूरयितुमीष्टे दृष्टत्वध्ययनानंतरभावी ज्ञात्वा कर्मसमाचरेदितिव्रीह्यादिवदुत्त
२ रक्रतुविधिपरिगृहीतत्वात् दृष्टः कर्मावबोधोध्ययनभावनायाः फलतयान्वीयते तत्र समानपदोपात्त श्रौ ४
मध्ययनंकरणं तद्व विचारमंतरेण न स्वफलं साधयितुमलमिति वेदार्थविचारो मीमांसापरप
र्यायइतिकर्तव्यतात्वे नोपतिष्ठते तमिमं विचारमाचार्यो जैमिनिः सकलजगदनुग्रहाय सदय २
हृदयः सूत्रैरुपबबंध ॥ ७ ॥ तत्रेदमादिसूत्रं ॥ ॥ अथातो धर्मजिज्ञासेति ॥ ॥ नन्वत्र विषयप्रयोज
नाद्यभावात् कथं श्रोतारः प्रवर्त्तेरन्निति चेत् शृणु प्रयोजनं तावत् साकामनिष्काम भेदेनाभ्युदयनिश्रे
यसे । विषयस्य च ज्ञाप्यजन्य भेदेन द्वेधा । ज्ञाप्यो धर्मः जन्यस्तत्ज्ञानं । संबंधस्तु शास्त्रस्य धर्मेण स
ह ज्ञाप्यज्ञापकलक्षणः तत् ज्ञानेन जन्यजनकलक्षणः । तथापि विघ्ननिरासप्रयोजकः शिष्टाचारप्र
माणकमंगलाचरणाभावात् अत्रत्यास्त्रोतृणाम प्रवृत्तिस्तदवस्थैव । मैवं वोचः सूत्रकारेणता
वत् प्रथमसूत्रादौ मंगलार्थ द्योतिनमथशब्दं प्रयुंजता[illegible]मंगलाचरणं कृतमेव ॥ ॐ काज श्राथ

शाब्दश्च द्वावेतौ ब्रह्मणः पुरा॥ कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभाविति वचनात्। तद्व्याकुर्वता भाष्यकारेणापि
तदेव कृतं। अथवायुष्मदस्मत्प्रत्ययगोचरयोरित्यत्र श्रीशंकराचार्यैर्मंगलाचरणाय पञ्चममंगलरूपः सर्वो पञ्चनि ह
तो विज्ञानघनः प्रत्यगर्थः समस्मर्यत। सर्वदा सर्वकार्येषु नास्ति तेषाममंगलं॥ येषां हृदिस्थो भगवान्मंगलायतनो हरि
रिति स्मृतेः॥ एवमिहापि भारतीय भगवन्नामसहस्रादिम विश्वनामपर्यायलोकपदवृत्ति तदनुपठ्यमानलोकवेधुताम
प्रत्यभिज्ञापकतया सदर्वेतिवा प्रथमसूत्रव्याख्यानपरे लोक इत्यादिभाष्ये भाष्यकारेण भगवानतुलमंगलनामधेयः
समस्मारीति मंगलमाचरितमेव॥ श्रीमत्प्रभट्टपादास्तु॥ विशुद्धविज्ञानविलसितविग्रहं जगादि वेदत्रयरूपनय
नत्रितयमखिलपुरुषार्थलाभनिदानमिन्दुखण्डमण्डितजटाजूटघटितमादितो नमस्यन्तो विशिष्टेष्टदेवताप्रण
तिरूपं मंगलमविधानमाचेरुः॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे॥ श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारि
णे इति तदीयशास्त्रारम्भः॥ केचित्पुनर्महापापिनः श्रीमत्कुमारिलभट्टदूषिणः समासन्नचतुर्दशीतिनरकाः
शास्त्रान्निरीश्वरमीमांसकाः सोमयागपरतया ऽदो वार्त्तिकमेवं व्याकुर्वते॥ अनेकधा शिक्षपद्धत्यादिभि
र्निपुणं ज्ञानगम्यं स्वरूपं यस्य वेदत्रयसमाहाररूपं चक्षुरूपिकं प्रमाणं यस्य तस्मै स्वर्गादिफलप्राप्तिहेतवे
सोमार्द्धं रसात्मकं त्याज्यं तयायो धारयति तस्मै नमः प्रह्वीभवामः इति दुराचाराः शास्त्रमन्यथयन्तो मिमि
होत्रं जुहुयाद्दीक्षितो वैदिकमपि वचः अग्निषोमीयमिति तस्य उत्रं मांसं जुहुयात् भक्षयेत् हृदानादनयोरि
त्येवं परतया व्याचक्षाणाः स्वाभिमतमांसादनमपि विदध्युरित्यलमस्मत्कर्णबुसोत्पवनप्रयासेन। तस्माद्दक्षिण
नयशास्त्रे समुत्पद्यल एव प्रवृत्तिः श्रोतॄणामिति भवति इदमान भस्यापि विषय इत्याशयते॥ ॥अथातो धर्म
जिज्ञासेति॥ तत्राथशब्दस्य चत्वारोऽर्थाः आनन्तर्ये अधिकारः पूर्वप्रकृतादर्थादर्थान्तरे मंग
ले च। तत्र द्वायाः अनधिकार्यत्वात् पूर्वप्रकृतादर्थान्तरतायाश्चानन्वयानुपपत्तेस्त्वात् मंगलस्य च द्यो

त्यत्वात् आनन्तर्यं परिक्षिप्यते। तच्च पूर्वप्रवृत्ताद् वेदाध्ययनात् यतस्तस्मिन् सत्येव धर्मजिज्ञासावकल्पते नास
ति॥ नन्वेवं सति वेदमधीत्य स्नायादिति स्मृतिविरोधः स्यात्। न। पूर्वकालतामात्रे यत्र क्त्वाप्रत्ययेनोच्यते ना
नन्तर्यं। अतो वेदाध्ययनानन्तरं धर्मं विचार्य स्नायादित्यनन्तर्ये कालता बाधिता भवति॥ यद्वा इण् गताविति
धातोर्गत्यर्थस्य ज्ञानार्थतामभिसंधाय वेदमर्थतो ज्ञात्वा स्नायादिति स्मृतिव्याख्यानेन को विरोधः॥
उक्तं च भट्टपादैः॥ ॥ अधीत्येत्यधिगम्येति व्याख्याने त्वविरोधिता॥ यतः पूर्वमध्ययनं वृत्तं अतस्तद्धेतु
को धर्मविचारः कर्तव्यः। यथा क्षेमसुभिक्षोऽयं देशः अतोऽत्र वसामीति। धर्मस्य जिज्ञासा धर्मजिज्ञासा
कर्तव्येति शेषः। न चात्र ज्ञातुमिच्छा जिज्ञासा इच्छाया अकर्तव्यत्वात्। अतो ज्ञाते धर्मे नेच्छा अज्ञाते न त
रामिति नित्यस्ते। सामान्यतो ज्ञाते विशेषजिज्ञासा विना विचारेण संभवतीत्यतो णीतो विचारः जिज्ञासाप श्री ४
श्री ४ दसामर्थ्यात्। वेदाध्ययनानन्तरं तद्धेतुको धर्मविचारः कर्तव्य इति प्रतिज्ञा सूत्रार्थः संपद्यते। इमे चार्था
अत्र प्रतिज्ञाताः को धर्मः किं प्रमाणकः कान्यङ्गानि क्रतुपुरुषार्थत्वमस्य कः कोऽस्य पुरुषो गुणो वा तद्भूत्या २
२ दयः तेषामेषामुत्तरः सर्वः प्रपञ्चः॥ ननु धर्मः प्रसिद्धो येन जिज्ञास्यः अथाप्रसिद्धो न तर्हि। सत्यं। के
चित् चैत्यवन्दनादि धर्ममामनन्ति अपरे अग्निहोत्रादिकं तत्र विना विचारेण यस्मिन् कस्मिंश्चित् उपादी
यमाने स्त्रीत्रो निःश्रेयसस्य समाप्तिः श्चानर्थस्यापि प्रत्यपायविघ्नं इत्येनेन निःश्रेयसहेतुर्धर्मो जिज्ञासि
तव्य इति प्रतिज्ञोपपद्यते॥१॥ ॥छ॥ ॥ तत्र को धर्मः किं प्रमाणकः इति प्रतिज्ञाद्वयं श्रुत्यर्थाभ्यामुपपा
दयितुमाह॥ ॥चोदनालक्षणोऽर्थो धर्मः इति॥ ॥ चोदनेति सविधिकं वाक्यमुच्यते लक्षणशब्दः प्रमाण
वाची। चोदनाप्रमाणको धर्मः स चार्थरूप इति सूत्रार्थः यो धर्मः स चोदनालक्षणः इति प्रमाणवचन
व्यक्तिश्रुत्या। अत्रार्थशब्दानुवादः यश्चोदनालक्षणः स धर्म इति स्वरूपवचनव्यक्तिर्वचनात्। अत्रस्य

रूपवचनव्यक्तोवाक्यभेदप्रसंगात् अभिमतप्रमाणवचनव्यक्तिलाभार्थो ऽथशब्दोनुवादः। नचचोदनायाः
प्रामाण्ये विगानं। नह्यग्निहोत्रं जुहुयात्स्वर्गकाम इत्यतो वाक्यादर्थे प्रतीते कश्चित्संदेहेनापि विपर्यस्य
ति॥ ननु कोयं विपर्यासो नाम। गृह्यमाणस्मर्यमाणयोर्ग्रहणस्मरणयोश्चाविवेकाग्रहणाद्यथाव्यवहारइ
तिसांख्यभास्करौ॥ तदयुक्तं॥ विवेकस्य भेदत्वे अभावत्वेन तयोस्तत्सिद्धौ ते वस्तुकस्य रूपत्वात् तद्ग्रहणेऽ
ग्रहणानुपपत्तेः बुद्धिरूढस्य रजतादेः शुक्त्यादावारोप इति योगाचाराः॥ तदपि न साधीयः॥ ज्ञानोवान्तत्वेन रजतस्य बाधे इदं र
जतमिति स्यात्। इदंताबाधे नात्रिनाधिष्ठानो भ्रम आपद्येत। ज्ञानोवान्तिनि असदेव रजतादि समारोप्यत इति माध्यमिकाः॥ तद
पि तुपाख्यायाद्विनस्यासतोऽपरोक्षावभासगोचरत्वानुपपत्तेश्च परास्तं। सदसत्त्वाभ्यामनिर्वचनीयमारोप्यत इति वेदान्तिनः रा
तदपि मनोरथमात्रं। सदसद्विलक्षणवस्तुनः क्वापि त्वे प्रमाणाभावात् असतो प्रतीतेः सतश्चाबाधादुभयान्यथानुपपत्तिः ४
प्रमाणमिति चेत्। न। देशान्तरगतस्यात्रारोपेण तस्याऽन्यथाप्युपपन्नत्वात्। अन्यत्रासतः शुक्तिरजततादात्म्यस्य कथ
मत्र प्रतीतिरिति चेत्। इदं मंत्रारजतीत्रातादात्म्यस्यान्यत्रापि सद्भावात्। परितुष्यतु भवान्। अतोन्यत्रारोपः अन्यथा
ख्यातिरेव विपर्यासः। नचासावग्निहोत्रादिवाक्येष्वस्तीत्युपपद्यत एव धर्मे प्रामाण्यं चोदनायाः॥ ननु चेत्तत्प्रामाण्यं
किं स्वतः परतो वा। परत इति। अप्रामाण्यं यथा कारणदोषात् काचकामलादेः प्रामाण्यं तथा गुणादिज्ञ
नादेः प्रामाण्यमिति। नतत्सम्यक्। सर्वत्राहि कार्यकारणभावः। अनन्यथासिद्धान्वयव्यतिरेकसमधिगम्यः गु
णान्वयव्यतिरेकौ विनाप्यप्रामाण्यहेतुदोषनिरासार्थत्वेनान्यथासिद्धौ न प्रामाण्यकारणत्वं गुणानां साध
यतः। अप्रामाण्येपि तथेति चेन्न। विना दोषमप्रामाण्यानुपपत्तेः। प्रामाण्ये तु विनापि ज्ञानादिगुणं चक्षुरादेर्ज्ञा
नकारणमात्रादेवोपपद्यत इति वैषम्यं। नचनैर्मल्यं गुणः। तस्य विजातीयस्यासामान्याभावतया कारणान्तरत्वात्
अतः प्रामाण्यं स्वत एव॥ उक्तं च भट्टपादैः॥ स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यतां॥ नहि स्वतोऽसती

...श्रीगोपाल॥ नेम्नू...

ज्ञा क्तिः कर्तुमन्येन शक्यतेऽद्भुत। वेदे त्वपौरुषेयतया आप्तप्रणीतत्वलक्षणो गुणः स्वीकर्तुमपि न शक्यः॥ ॥ ननु सर्वज्ञप्र
णीतो वेदः कथमपौरुषेयः। इष्यते तस्य ज्ञावेऽप्रमाणाभावात्। नन्वेवेद एव प्रमाणमिति नेतरेतराश्रयत्वात्। न चैवमनी
श्वरापत्तिर्मीमांसकानां तस्य वेदप्रणेतृत्वमात्रनिराकरणात्॥ उक्तं च भट्टपादैः॥ "यत्नतः प्रतिषे[redacted]पुरु ध्यान्नः३
षाणां स्वतन्त्रताम्॥ इत्यत्र स्वरूपनिराकरणं तु विशुद्धज्ञानदेहाय इत्याद्युपक्रमं बोधात् न मिथ्याभियो
क्तव्यं। मिथ्याभियोगिनो दोषो द्विगुणितयोगी स्वेन दोषाभिधानात्॥ एतच्च श्रीमत्[redacted]भट्टकोटीश्वरामीबि
श्रीसनणानुग्रहाद्वगन्तव्यं। अतः सिद्धं धर्मे प्रामाण्यं चोदनायाः॥ ननु स्वरूपवचनवक्ताऽवर्धत्वादः किमर्थः। नूय
नाद्यनर्थनिवृत्त्यर्थमिति ब्रूमः। कथं नूयेनादेरनर्थत्वं यावताऽसावप्यर्थ एव। अग्नीषोमीयं पशुमालभेतेति वत्
नूयेनेनाभिचरन् यजेतेत्यत्रापि हिंसाहाविहितत्वात्। विधिस्पृष्टे च निषेधानवकाशात् न हिंस्यात्सर्वा भूतानी
श्री॥ ८ तिसामान्यनिषेधस्य विहितव्यतिरिक्तार्थकृतार्थत्वात्॥ मैवं वादीः॥ अग्नीषोमीये हि भावनाकरणांशप्रवृष्टा श्री॥ ८
४ मवति हिंसा विधिस्पृष्टा। इहत्वभिचरन्निति हत्वर्थस्य शत्रुनाभिचरन्निति शत्रुमित्यर्थे व्याख्यायमाने भावनाफली ४
त्वापातिन्या हिंसाया रागतः प्राप्तेर्न विधिस्पर्शः। तथा भावकारः॥ उक्तं च भट्टपादैः॥ फलांशे भावनायाश्च प्र
त्ययो न विधायक इति। अतो निषेधाक्रान्तत्वाज्जुवत्येवानर्थत्वं नूयेनादेरिति तद्व्यावृत्त्यर्थमर्थ न्नानर्थत्वाद्यः।
ततः सिद्धमेतच्चोदनालक्षणो[redacted] धर्म इति ननु चोदनालक्षणो धर्मः। अर्थश्च धर्म इति अर्थद्वयविवक्षायां वा
क्यं भिद्येत। भेदद्वये दोषावैदिक वचसि नावगतार्थबोधनिषेधाय। सचैत्यनेकार्थसूत्रनात्मनि दूरम
ध्य दोषस्यापीज्ञावनामिति। अस्याश्च वचनव्यक्तेः स्वरूपं वेदहस्त त्र्यलइति आचार्यजैमिनीकृतप्रायत्वोदेष
निर्वाहो दर्शितः॥ वस्तुतश्च प्रमाणवचनव्यक्त्या श्रूयणे नैकवाक्यत्वसंभवति वाक्यभेदोन्यायविदीनेष्ट
इति तदाश्रयणमयुक्तं। तथा च प्रमाणलक्षणस्यादौ नवक्तोऽपपद्यते। अन्यथा धर्मस्वरूपानन्तरं भेदलक्ष
णमादौ क्रियेत न चाकाम्नीतिस्तद्धि चोदनालक्षणार्थो धर्म इति॥ ७॥ ॥ अत्र चोदनैव धर्मे प्रमाणं प्रमाणम

वेत्यवधारणद्वयमुपक्षिप्तं । तत्र चोदनैवेत्येतत् साधयितुमुपक्रमते ॥ तस्य निमित्तपरीष्टिरिति ॥ तस्य धर्मस्य ज्ञाने ये
निमित्ते प्रत्यक्षादि तस्य परीष्टिः परीक्षा कर्तव्या । न च परीक्ष्य सिद्धवत् चोदनैव धर्मे प्रमाणमिति वक्तुं युक्तं ।
तत्र प्रत्यक्षस्य लक्षणाभिधानपुरस्सरमनिमित्तत्वमाह ॥ ७ ॥ सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्र
त्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् । सता विद्यमानेनार्थेन इन्द्रियाणां संप्रयोगे सति या पुरुषस्य बुद्धिर्जा
यते तत्प्रत्यक्षं तच्च धर्मे न प्रमाणं तस्य विद्यमानार्थग्राहकत्वात् । धर्मश्चानुष्ठेयतया कालत्रयासंस्पृष्टत्वान्न
विद्यमानः । यद्यपि वस्तुतो भविष्यन्नास्ति तथापि तस्य विनानुष्ठानमसंभवात् तथेत्युच्यते । नियत भविष्य
त्वेनुष्ठानवैयर्थ्यापत्तेः अतः प्रत्यक्षं धर्मे न प्रमाणं । प्रत्यक्षावगताविनाभावसादृश्यानुपपद्यमानपूर्वक
त्वादनुमानोपमानार्थापत्तयोपि न धर्मे प्रमाणतामश्नुवते । तर्हि प्रमाणाभावात्मकस्याभावप्रमाणस्या
स्तु गोचरो धर्म इत्याशंक्य चोदनारूपं प्रमाणमुपन्यस्य तत् प्रमाणमेवेतीममर्थमुपपादयितुमाह ॥ ७ ॥
औत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायण
स्यानपेक्षत्वात् । औत्पत्तिकः स्वाभाविकः शब्दार्थयोः संबंधः नाधुनिकः अतोऽग्निहोत्रं जुहुयादित्यादिरूप
शब्दो विधिः चोदना चोपदेशश्च विधिश्चैकार्थवाचिन इति भट्टोक्तेः । तस्याग्निहोत्रादिलक्षणस्य धर्मस्य ३०
ज्ञानकरणे ल्युट् ज्ञापकं प्रमाणं । ज्ञायतेऽनेनेति तत् ज्ञानं एकाधिकरणे च लेडिति तदुक्तं चैव । एतेनानुत्पत्तिल
६४ क्षणमप्रामाण्यं प्रत्युक्तं । विपर्ययनिरासायाह अव्यतिरेकस्तज्ज्ञानस्य । व्यतिरेको विपर्ययः चकारात्
संशयश्च । अर्थेनुपलब्धे इत्यनुवादकत्वं निरस्यति । अतस्तच्चोदनारूपं प्रमाणमेव अनपेक्षत्वेनाज्ञात
ज्ञापकत्वात् । बादरायणग्रहणं पूजार्थं न परमतत्वेन । तस्माच्चोदना धर्मे प्रमाणमेवेति । अत्रावधार
णमुपपद्यते । उपवर्षस्तु निमित्तसूत्रे न जन्म अध्याहृत्य प्रत्यक्षसूत्रे न तत्सतो व्यत्ययं विधाय तदादेरत्र

यमन्यथाव्याचख्यौ। तस्यानिमित्तपरीक्षानुकर्त्तव्याप्रसिद्धानि हि प्रत्यक्षादीनि नु शास्त्रं चलदेतगति तस्मात्तदपि
नपरीक्षणीयं। व्यभिचारोऽपरीक्षितव्यमिति चेत्। न। यज्ञमाणं तन्न व्यभिचरति यद्व्यभिचरति न तत्प्रमा
णं। तर्हि प्रत्यक्षस्य किं लक्षणं तत्राह सत्संप्रयोगे पुरुषस्येंद्रियाणां बुद्धिजन्म तत्प्रत्यक्षमिति तेनावभास
माने नार्थे नइंद्रियाणां संप्रयोगे सति पुरुषस्य यत् बुद्धिजन्म अतः सद्बाधककारणदोषरहितं तत्प्र
त्यक्षं। अतः प्रत्यक्षं तावत् न व्यभिचरति॥ ननु सर्वे विमताः प्रत्यया निरालंबनाः प्रत्ययत्वात् स्वप्ना
दिप्रत्ययवत्। एवं बाधककारणदोषो हि निरालंबनत्वे प्रयोजकौ दृष्टांतौ दृष्टांते विहस्तिभादिप्रत्ययेषु
व्यापको व्यावर्त्तमानोऽस्य व्याप्यं निरालंबनत्वं व्यावर्त्तयतः। शून्यवादी तु ज्ञानस्याप्यभावमभिप्रेत्य
निरालंबनवादयुक्तानुमानहेतोराश्रयासिद्धिं सूचे। तद्वासत्प्रत्यये मिथ्यात्वे प्रमाणाभावात्। बाधकारण
दोषो हि विषयस्य वाभावमावेदयतः तौ न ज्ञानस्यापि। अतो माध्यमिकदूषणमवधीर्य योगाचारोक्तहे
तोरप्रयोजकत्वादोषं दूषणं। तस्मात् यत्प्रत्यक्षं तन्न व्यभिचरतीति न तत्परिहायतत्परीक्षणीयं।
सत्त्वस्य स्वचनात्मकत्वात् प्रत्यक्षलक्षणस्योक्तत्वात् अनुमानादेर्लक्षणमुपवर्षाभिमतमाह भाष्यकारः।
अनुमानं ज्ञातसंबंधस्यैकदेशदर्शनात् एकदेशांतरे ऽसंनिकृष्टेऽर्थे बुद्धिरिति। ज्ञातः संबंधो व्या
प्तिलक्षणो व्याप्यव्यापकयोर्दृष्टांतधर्मिणि येन पुरुषेण तस्य एकदेशस्य व्याप्यस्य धूमादेर्दर्शनादेकदे
शांतरे व्यापके वह्न्यादौ चक्षुराद्यसंनिकृष्टेऽर्थे या बुद्धिस्तदनुमानमिति। तद्द्विविधं प्रत्यक्षतोदृष्टं
सामान्यतोदृष्टं च। आद्यं धूमादौ वह्निज्ञानं। अपरं देशांतरप्राप्त्या अर्यमणि गत्यनुमानं अन्येत्वान्य
थैव व्याख्यांत्येकपादय आचार्य प्रदर्शितास्ते दाः संग्रहाधिक्यान् नेहालेख्यंते। अत्रापि यदसिद्धादि
दोषैरर्थे व्यभिचरति न तदनुमानं। यदनुमानं तन्न व्यभिचरतीति तदपि न परीक्षितव्यं॥ ॥६॥ ॥

शास्त्रं शाब्दविज्ञानादसन्निकृष्टेर्थे विज्ञानं । शब्दोच्चारणात्पदार्थविज्ञानाच्छब्दस्यैव वा श्रवणोत्थादिज्ञा
नात्पदार्थद्वारेण चक्षुराद्यसन्निकृष्टेर्थे वाक्यार्थे यत् विज्ञानं तच्छास्त्रं । तत्र प्रवृत्तिनिवृत्तिफलकं ।
प्रवृत्तिर्या निवृत्तिर्या नित्येन कृतकेन वा ॥ पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयत इति सद्भोक्तेः ॥ अ
तो वाक्यमेव प्रमाणं । पदं त्ववगतार्थगत्वात् स्वार्थे न प्रमाणं ॥ उक्तं च ॥ पदमभ्यधिकाभावात् स्मार
कान्न विशिष्यते इति । यत्तु श्रीतिविजले [illegible] सादिमूलतया स्वार्थं व्यभिचरति न तत् शास्त्रं यच्छास्त्रं तन्न व्यभि
चरति । विशेषतो अपौरुषेयं वैदिकं वाक्यमिति तदपि न परीक्षितव्यं ॥ ७ ॥ उपमानमपि सादृश्यमस
न्निकृष्टेर्थे बुद्धिमुत्पादयति । वनेगतस्य गवयं प्रत्यक्षतो गृह्यमाणे यदप्रत्यक्षं गोसादृश्यं तदसन्निकृ
ष्टेर्थे ग्रामस्थगवि अनेन सदृशो मदीयो गौरिति या बुद्धिमुत्पादयति तदुपमानं । न च विज्ञातगोविषयत्वेने
यं स्मृतिरिति वाच्यं । सादृश्यविशिष्टस्य गोः प्राक् अनवगतत्वात् । गोसदृशो गवय इति वाक्यमुपमानमि
ति केचित् । तन्न चारु । तस्य शाब्दज्ञानानतिरेकात् । गोसदृशो गवय इति अतिदेशवाक्यमाकर्ण्य अरण्यं
प्रस्थितस्य यद्गोसादृश्यविशिष्टगवयज्ञानं तदुपमानमिति नैय्यायिकाः । तदपि शाब्दसंज्ञत्वसह
कृताक्षिजन्यत्वात् सविकल्पकं प्रत्यक्षमेव । अतः प्रागुक्तमेवोपमानं साधीयः । तत्र स्वार्थं न व्यभिच
रति यत्तु भ्रान्तसादृश्यपदं न्यं व्यभिचरति न तदुपमानं । अतो लोकप्रसिद्ध्यानुतदपि न परीक्षणी
यं ॥ ७ ॥ अर्थापत्तिरपि दृष्टः श्रुतो वार्थो न्यथा नोपपद्यत इति अर्थकल्पनाद् दृष्टो जीवतश्चैत्रस्य
गृहाभावो बहिर्भावं विनान्यथानोपपद्यत इति अर्थस्य बहिर्भावस्य याकल्पना सा दृष्टार्थापत्तिः ।
तथा श्रुतः पीनो दिवानभ्यवहानशब्दो धिनाना रात्रिभोजनशब्दं नोपपद्यत इत्यर्थस्य रात्रिभोजनशब्दस्य

याकल्पना साश्रुतार्थापत्तिः। शब्देनुपपद्यमाने शब्दकल्पनायाः एवोचितत्वात्। यात्वन्यथानुपपत्त्य
न्यथैवोपपत्त्यनुदयाख्यदोषेनः स्वार्थं व्यभिचरति न सार्थापत्तिः। यार्थापत्तिः सा न व्यभिचरतीति
सापि न परीक्षणीया ॥ ८७ ॥ अभावोपि प्रमाणाभावो नास्तीत्यस्यार्थस्यासन्निकृष्टस्येति। प्रत्यक्षादि प्रमा
णपञ्चकाभाव इह भूतले घटो नास्तीत्यस्य प्रमेयाभावाख्यस्य चक्षुराद्यसन्निकृष्टस्यार्थस्य ज्ञापक इति
शेषः। षष्ठं प्रमाणमभाव इत्युच्यते तस्य च गोचरोऽभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽन्योन्याभावो
त्यन्ताभाव इति। न चासौ निरूपाख्यः प्रागादिभेदभिन्नत्वात् शब्दगोचरत्वाच्च। सोयमभावः प्रमाणं चक्षु
र्व्यवहितादौ योग्यानुपलब्धिरूपोऽभावः स्वार्थं व्यभिचरति न सि प्रमाणं यः प्रमाणं न स व्यभिचरतीत्यसा
श्री । वपि न परीक्षणीयः ॥ ८८ ॥ एषु च प्रत्यक्षादि प्रमाणेषु यदाक्षतसन्निकर्षादि प्रमाणं तदा ज्ञानं फलं। यदा ज्ञा श्री ।
नं प्रमाणं तदा तज्ज्ञानस्य जनकानुविषयस्यैव प्राकट्यं फलं यदनुमेयं ज्ञानं ज्ञानं वात्मनो विकारो विशेषाद्वेत्ति
६ सङ्गः न च विकारित्वे आत्मनो नित्यत्वव्याहतिः ज्ञानपरिणामस्यानित्यत्वोपाधित्वात्। धीक्रियाज्ञान ६
रूपास्यानित्यत्वोपचारोस्त इति भट्टोक्तेः। एवमेतानि लक्षणतो लोकप्रसिद्धानि प्रमाणानि तदन्तर्गतिं च
त्रोख्येलस्मात्तदपि न परीक्षणीयं ॥ ८९ ॥ एवं तावत्तर्कोक्त्या प्रत्यक्षं लक्षयता सञ्चकृता संसितान्यनुमा
नादीनि भाष्यकृता श्रुत्या प्रदर्शितानि। अधुना सञ्जावयवेन पूर्ववादी चोकते अनिमित्तं विद्यमानोपलम्भ
नत्वादिति। भवन्तु प्रत्यक्षादीनि स्वार्थे प्रमाणानि चोदनानु न धर्मे निमित्तं प्रमाणं। कुतः विद्यमानोपल
म्भनत्वात् इन्द्रियाणि। तानि हि विद्यमानेनैवास्यमर्थमुपलभन्त एव न चासौ त्रेष्वधर्मस्तत्तमुत्पन्नोऽपलम्भाय च
क्षुषोपलभ्येत यदोपलभ्येत कालान्तरे न तदास्ति स्वर्गादिः अतश्चित्रया यजेत पशुकाम इति वचः प्रत्यक्षविसंवादा
दप्रमाणमित्याक्षेपः। तथा सर्व एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं यातीति श्रूयते।

नन्वस्फ्यकपालादियज्ञायुधोपेतो यजमानः स्वर्गं लोकं गच्छन् प्रत्यक्षेणोपलभ्यते तस्य तदैव भस्मीभावात् तस्मादेत
दपि अवैनिमज्जंत्यलाबूनि ग्रावाणः प्लवन्त इतिवत् प्रत्यक्षविरोधात् अप्रमाणमिति द्वितीयः एवं कश्चित् दृष्टाप
चारत्वे तत्सामान्यादग्निहोत्रादिचोदनानामप्यप्रामाण्यमिति कथं चोदनालक्षणो धर्म इति ॥ ॥ तदेतन्निराकुर्वा
णः प्रामाण्यं तावदुपपादयति । औत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमिति तुर्नेत्यर्थे । नाप्रामाण्यं
चोदनायाः । यतः औत्पत्तिकः नित्यः अपौरुषेयः शब्दार्थयोः संबंधः तस्य चोदनालक्षणः सम्यक् प्रत्यय इ
त्यस्यार्थस्य ज्ञानं ज्ञापकः निश्चायकः पौरुषेयो हि विप्लवते प्रत्ययः अयं तु न तथा अतः प्रमाणमेव ॥ ननु श
ब्दार्थयोः संबंध एव नास्ति कुतः पौरुषेयता । अपौरुषेयता वा न तावत् संयोगः क्षुरमोदकशब्दोच्चारणे मु
खस्य पाटनपूरणप्रसंगात् । न समवायः अयुतसिद्धत्वात् । न कार्यकारणभावः भिन्नसामग्रीकत्वात् । ना
श्रयाश्रयिभावः वियदवन्यादिनिलयत्वादिति चेत् । न वाच्यवाचकभावसंबंधस्याभिप्रेतत्वात् । न च
शब्दस्य वाचकत्वे कथं प्रथमश्रुतादर्थप्रतीतिरिति वाच्यं चक्षुषो रूपादिग्राहकत्वेप्यालोकापेक्षाव
त् शब्दस्य संगतिग्रहणापेक्षायामपि वाचकत्वाविरोधात् तस्मादस्ति शब्दार्थयोः संबंधः ॥ ॥ ननु भ
वतु संबंधस्तथापि भिन्नदेशत्वादनयोः कृतक एवासौ भवेत् नापौरुषेयः मुखे हि शब्दमुपलभामहे
भूमावर्थं भिन्नदेशयोः संबंधो रज्जुघटयोरिव कृतक एव दृष्टः अतोऽपि न चोदना धर्मे प्रमाण
मिति तृतीयः प्रामाण्याक्षेपः ॥ ॥ तत्र संबंधाक्षेपं परिजिहीर्षुः संबंधिनित्यत्वद्वारा तन्नित्यत्वप्रति
पादनाय प्रथमं तावत् शब्दस्य स्वरूपं विविच्य कथयितुं जैमिन्यायेन प्रस्तौति भाष्यकारः अथ गौरि
त्यत्र कः शब्दः इति ॥ ननु किमत्र प्रष्टव्यं गकारौकारविसर्जनीयाः पदं । तन्न प्रत्येकसमुदायविक
ल्पासहत्वात् । एकैकस्माद्वर्णाद्यथा प्रतीतिः न प्रत्येकमर्थबोधकत्वं वर्णानां । समुदायस्तु क्ष

णविनानिनांतेषामनुपपन्न एव अतो वर्णत्रयोच्चारणं विपतौयतोर्थप्रत्ययः स पदात्मा शब्दः स्वार्य
स्फोटः एकत्वेन प्रकाशकत्वेन स्फोट इत्याख्यायते एवमेव वाक्यस्फोटः तस्मान्नवर्णात्मकः शब्दः किंतु स्फो
रूप २ ट एवेति वैय्याकरणाः तदेतत् कुलधर्ममात्रं पूर्वानुभूतवर्णसंस्कारसहितस्यांत्यस्य वर्णस्यार्थप्रत्यायक
त्वात् विहायः सुमनोनि स्फोटसद्भावे प्रमाणाभावात् अतो विशिष्टानुपूर्वीका वर्णा एव पदं। ते च वर्णा
नित्याश्च सर्वदेशकालेष्वेकत्वप्रत्यभिज्ञानात् सामान्यनिबंधनं तदिति चेत्। न। वायवीयसंयोगविभागाख्य
ध्वन्यात्मकोपाधिपरामर्शं मंतरेण प्रत्यामिक गादिव्यक्तिभेदाभावात् तथात्वे सर्वत्र सर्वदा कथन्नोपल
भ्यंत इति चेत्। अभिव्यंजकाभावादिति ब्रूमः अतो वर्णा एव पदं तस्य च नित्यत्वं वक्ष्यामः तस्मान्नशब्दो
श्री ८ रव्यः संबंधी नित्य इति सिद्धं॥ ७॥ ननु भवतु नित्यः शब्दः तथापि द्वितीयः संबंधी वाच्यार्थः सास्नादिमान् व्यक्तिर्वा श्री ८
७ शेषोऽनित्य इति कथं तत्संबंधस्य नित्यत्वमुच्यते आकृतिर्शब्दवाच्या सर्वव्यक्तिष्वनुगता प्रतिव्यक्ति कृत्स्नसमवायि
७ नी एका नित्या जातिर्नव शब्दार्थो न व्यक्तिः आनंत्यव्यभिचाराभ्यामस्याः संगतिग्रहणासंभवात् न चेयं जातिरप्र
माणिकी तिबाच्यं गौर्गौरित्यनुगतप्रत्ययस्य तत्र प्रमाणत्वात् वनपंक्त्यादिवत् त्वौतायै प्रत्यय इति चेत्। न। वनादि
प्रत्ययस्य एकदेशोपाधिकत्वात् अयं तु निरुपाधि इतरन्यथासिद्धो जातिमंतरेणात्मानमलभमानो भवत्येव जातौ प्र
माणं तस्मात् शब्दवदर्थोपि नित्य इति सिद्धं॥ स्यादेतत्॥ भवतु शब्दार्थयोर्नित्यत्वे संबंधस्तु कृतयोः केनचिदादिकर्त्रा जि
गदादौ निर्मितः ततो व्यवहारार्थं वेदः प्रणीत इति॥ तदचारु॥ संबंधकर्तर्यपि प्रमाणाभावात् प्रत्यक्षं तावन्न क्रमते।
अस्मादादिभिरनुपलभ्यमानत्वात् योगिसद्भावे च प्रमाणाभावात्॥ ननु मास्तु प्रत्यक्षं अनुमानं तु भविष्यति। वि
मतः संबंधः सकर्तृकः शब्दार्थसंबंधत्वात् वृद्धिनादेशित्यादिसंबंधवदिति चेत्। न। तस्य स्मर्यमाणकर्तृकत्व
प्रयुक्तत्वेनोत्कृष्टतोऽनप्रयोजकत्वात्। अगृहीतसंबंधात् शब्दादर्थाप्रतीत्यन्यथानुपपत्त्या संबंधस्य कर्त्तारं
कल्पयाम इति चेत्। न। अनादिवृद्धव्यवहार [illegible] ग्रहणापेक्षत्वेनान्यथाप्युपपद्यमानत्वात् अ

नादिसंबंधमनादिव्यवहारतोवगम्य अर्थप्रतीतिसिद्धौ किमंतर्गडुसंबंधकर्तृकल्पनया किंच अनादिकत्वस्य सिद्धौ वेदो
दमस्य नामेति गवादिशब्दार्थसंबंधः क्रियते तथा क्रियतां चेदिदमौदिंबुद्धीनामक्षलसंगतीनामंगीकरणे तथैव सर्वत्र व्य
वहारसिद्धौ फलमर्द्धं नवतीयेन । अपि च प्रत्यक्षानुमानयोः प्रत्यक्षं बलीयः तत्त्याज्यायेनाद्य सूत्रकारः पदेनाक्षेत । प्रत्यक्षं हि
दृष्टव्यवहारमनुपादत्तेति व्यवहर्तृनिःकल्पस्वकृत्तासंबंधस्य युक्त्येतन माहाव्यतिरेकश्चेति यथा स्पिनूदेनेसोसानादि
मतिगोत्रादिष्वपि एवं देत्रात्तोपि न चैवमेकः कर्तुमशक्तः अनेकेषां वनसंगादिनियमः अतः सर्वत्र संबंधस्याव्यतिरेका
त् एकरूपत्वात् न तत्कर्त्ता कल्पनीयः किंच प्रमाणांतरेणानुपलब्धे देवतादावर्थे संबंधकरणमशक्यं तस्मात् नित्यः
शब्दार्थयोः संबंधः ततश्च लदग्निहोत्रादिवाक्यं प्रमाणं पुरुषानपेक्षत्वात् बादरायणपदमुक्तार्थं अतोध्यक्षा
दिमानानां संबंधादिपनाहतेः । चोदनालक्षणो धर्म इति सिद्धमनामयं इति संबंधाक्षेपपरिहारः ॥ अथ सौत्रं चित्राक्षे
पं जैमिन्यानायादित्यो भाष्यकारः परिहरति स्म । तद्यथा यदुक्तं चित्रेष्टौ न तत्र पश्वादिनोपलभ्यते यदोपलभ्यते
न लदा चित्रेति ॥ तद्भाष्य ॥ "साध्यसाधनसंबंधमात्रं हि फलकर्मणोः चोदनया प्रतिपाद्यते नानंतर्यं । फलोत्पत्तिस्तु
साधनसामर्थ्यवैचित्र्यादनेकरूपा किंचिन्नियतो हि कफलमेव कर्म यथा कारीर्यादि किंचिन्नियतामुष्मिकफलं य
थाग्निहोत्रादि अपरमनियतफलं यथा चित्रादिनात्र व्यापारश्चोदनायाः । साध्यसाधनसंबंधमात्रबोधितत्वो गिरौ
चित्रादीनामतोध्यक्षाविरोधान्न प्रमाणता" इति चित्राक्षेपपरिहारः ॥ अथ यायज्ञायुधवाक्ये प्रत्यक्षविरुद्धतोद्भा
विता तत्रापि परिहारः । शरीरादन्यः प्राणादिवेदकः कर्ता भोक्ता विज्ञाता सुखदुःखेच्छादिगुणक आत्मा यज्ञायुधी
त्युच्यते सुखादयश्च यावद्देहभावित्वात् अनन्यवेद्यतया रूपादिविलक्षणा न शरीरधर्माः नित्यश्चायमात्मा अ
विनाशी वा अन्ययमात्मत्वात् श्रुतेः यजेत स्वर्गकाम इत्यादि स्वर्गयागादिसाध्यसाधनसंबंधप्रतिपादकश्रुत्य
न्यथानुपपत्तेश्च । अनित्यत्वे हि कृतनाशाकृताभ्यागमौ प्रसज्येयातां । सुखदुःखव्यवस्थान्यथानुपपत्ते
श्च प्रतिशरीरं भिन्नः न च देहात्मप्रतिपादनमद्वैतश्रुतिविरुद्धं लोकलोकायतमतनिरासेन देहादिव्य

नित्यकालसज्ञानप्रतिपादनप्रवृत्तत्वात् भाष्यकारस्य भेदप्रधानकर्मकाण्डविवेचनपरसूत्रव्याख्या
नपरत्वाच्च तत्त्वलक्ष्य अखण्डानन्दैकरसं अद्वितीयमात्मा तत्त्वमविद्याद्युपहतत्वेन प्रमातृत्वभोक्तृत्वा
दिव्यवहारगोचरद्वैतत्राबध्योऽभिसंधिः। विवृतश्चासौ भगवत्पादैः॥ इत्यादिनास्तिक्यनिराकरणमुखेनात्मास्ति
त्वो भाष्यकृदत्र युक्त्या। इदं त्वमेतद्विषयश्च बाधः प्रयाति वेदान्तनिषेवणेनेति भाष्यकारस्यापि निडाग्रा
याऽग्रकरणं कर्मिणां कर्मलक्षणानां आद्यान्तिमाख्यनिर्वाहार्थं अकर्त्रात्मप्रतिपादनोहिते कर्मणि शि
थिलप्रयत्ना भवेयुः। अवरूपैस्तैः पाव्यवस्त्वङ्गीकर्तव्या। कथमपरथा ज्ञासिविभागो प्रपंचसत्यत्वपरा
विवृतं मिथ्यात्वं वदतो वेदस्य वस्तुनि विकल्पासंभवेन पूर्वापरविरुद्धार्थाभिधायित्वप्रतारकत्वेन श्री ३
श्री ४ प्रसज्यमानमप्रामाण्यमत्र भवद्भिः परिह्रियेत। देहादिव्यतिरिक्तो नित्यो न क्षिपयश्च मानं। यत्ना ८
८ युधीतिनाध्यक्षविरोधश्चोदनास्विह॥ इत्यस्याक्षेपपरिहारः॥२॥ अधुना औत्पत्तिकसूत्रोपक्षि
प्तशब्दार्थसंबंधनित्यत्वमाक्षिप्य शब्दानित्यत्वमाशंक्य तन्निराकरणाय शब्दाधिकरणमारभ्यते॥
तत्र षड्भिः सूत्रैः पूर्वपक्षः षड्भिः तन्निराकरणं पुनरन्यैः षड्भिः सिद्धान्त इति विभागः॥ तदिदमधिक
रणपदोक्तं कश्च शब्द उदाहरणं स किमनित्यः किं वा नित्य इति संदेहः। किं तावत् प्राप्तं अनित्य इति त
त्र सूत्रं॥६॥ ॥कर्मैके तत्र दर्शनादिति॥ ॥तस्यार्थः। कर्म कार्यं शब्दस्य एके नैयायिकादयो मन्यं
ते। तत्र तस्मिन् कर्मणि सति शब्दस्य दर्शनात् अनेनानुमानमुपन्यस्तं। अनित्यः शब्दः प्रयत्नानन्तरी
यकत्वात् घटादिवदिति॥ ननु प्रयत्नस्य व्यंजकत्वेन नित्यत्वेऽप्युपपद्यमानत्वात् हेतुरनैकान्तिकः। न
अभिव्यक्तेः प्राक् शब्दसद्भावे प्रमाणाभावात्। इत्यप्यनित्य इत्याह॥ ॥अस्थानादिति॥ ॥उच्चार
णानन्तरं अवस्थानाभावात् विनष्टः शब्दः नच सतोऽप्यनुपलम्भः सत्वे मानाभावात् शब्दं कुरु दृष्टमा

कार्षी मित्यादि करोति शब्दव्यवहारादप्यनित्यः शब्द इत्याह करोति शब्दादिति धातुनिर्देशोऽतिप् । करोतिरूपाच्छब्दादि
त्यर्थः ॥ इतोऽपि कृतक इत्याह ॥ सत्वान्तरे च यौगपद्यादिति ॥ नानादेशेषु सत्वान्तरेषु प्राण्यन्तरेषु यौगपद्यात् युगपदुपल
भ्यमानत्वात् । न ह्यकृतक एको नानादेशेषु उपलभ्यते शब्दश्च । कृतकत्वे तु कारणीयत्वत्वेन सर्वमुपपद्यते । इतोऽप्यनित्या
ह ॥ प्रकृतिविकृत्योश्च दर्शनादिति विशेषः । दध्यत्रेत्यत्र इकार प्रकृतेर्यकारो विकृतिः न च नित्यत्वे प्रकृतिविकृतिभावः तत
स्मादनित्यः । इतोऽपि कृतक इत्याह ॥ वृद्धिश्च कर्तृभूम्नास्येति । कर्तृणां भूम्ना बहुत्वेन वृद्धिः बहुत्वमस्य शब्दस्य उपलभ्य
त इति विशेषः । बहुषु शब्दमुच्चारयत्सु महान् शब्दः श्रूयते न चेद् बहुभिरसावभिव्यज्यते बहुभिः प्रदीपाभिव्यञ्जनादिवत्तावा
नेवोपलभ्येत । कृतकत्वे तु पाचितावयवत्वेन सर्वमुपपद्यते तस्मात् कृतकः शब्द इति सिद्धं ॥ अत्राभिधीयते ॥ समं तु तत्र द ३६
र्शनमिति ॥ तुनेत्यर्थे तत्र कर्मणि प्रयत्नाभ्यासातिशयच्छब्दस्य दर्शनं तत् उत्पत्तिपक्षे अभिव्यक्तिपक्षे च समं तुल्यं । व्युक्तपमा
णेनन्यायेन । सिद्धे शब्दानित्यत्वे प्रयत्नानन्तरीयकत्वस्य अभिव्यञ्जकत्वेनान्यथासिद्धतया कृतकत्वाप्रयोजकत्वात् इत्यभिप्रायः ॥
अस्थानात्प्रत्येतद्दूषयति । सतः परमदर्शनं विषयानागमात् इति यत् परं कारणमुक्तमनित्यत्वे तत्तु सतो विद्यमानस्यैव शब्द
स्यादर्शनेन न त्वसावप्यसतोऽदर्शनं परं कवत् न त्वभावदर्शनं विषया कुतः अभिव्यञ्जकानां वायवीयसंयोगविभागानां श्रोत्र
केण शष्कुल्यवच्छिन्ननभसो देशस्य व्याप्तत्वात् विषयशब्दं प्रत्यनागमात् अगमनात् उच्चारयितृमुखादुत्थितवायवीयाः
संयोगविभागाः प्रसर्पन्तः स्तिमितसमीरापसारणेन शब्दं व्यञ्जयन्ति तदभावात् सतोऽपि शब्दस्याग्रहणं न स्वरूपाभाव
इत्यभिप्रायः । करोति शब्दमित्याह ॥ प्रयोगस्य परमिति ॥ यत्परं कारणमुक्तं कृतकत्वे शब्दं कुर्वित्यादि तत्प्रयोगस्योच्चार
णस्य न तूत्पत्तेः गोमयान् कुरु पादौ कुरु अवकाशं कुरु इत्यादिवदित्यर्थः ॥ योगपद्यं प्रत्याह ॥ आदित्यवद्यौग
पद्यमिति ॥ यथा एक एव आदित्यो नानादेशेषु अनेकैर्दृश्यते एवं शब्दोऽपीत्यर्थः । प्रकृतिविकृतिभावं प्रत्याह ॥ शब्दान्तरं विकार
इति । यस्त्वयाद ध्य[illegible]त्रेत्यत्र इकारस्य यकारो विकारोऽभिहितः तच्छब्दान्तरं पचमते शब्दस्य गुणत्वात् स्याम तेच विरुद्ध
त्वात् विकारायोगात् सादृश्याद्विकारत्वे दधिपि दकारादेरपि अडपिडकादयो विकाराः किं न स्युः । तस्मादसदेतत् ॥ वृद्धि

प्रत्याह। नादवृद्धिः परेति। त्वयापि नाशब्दस्य वृद्धिर्न निहिता। सा नादस्य वायुसंयोगविभागात्मकस्य ध्वन्याख्यस्य नानित्य च
यवस्य शब्दस्य बहुभिरुच्चारयद्भिः उत्पद्यमानाः संयोगविभागाः पृथक् शब्दव्यञ्जयन्तः श्रवणगतमुपचितत्वं तत्र चोपचयन्तः शब्दमह
त्वप्रतिभासमुपजनयन्ति न स्वतः शब्दे वृद्धिमहत्वाद्युपपद्यते अतो मुखबहुत्वागृह्णे शब्दकलकलकुलधर्मे॥ ननु परनीत पक्षप्रतिक्षे
पमात्रान्न स्वपक्षसिद्धिः। तत्राह॥ नित्यस्तु [redacted] स्याद्दर्शनस्य परार्थत्वादिति॥ नित्य एव शब्दः स्यात् कुतः दर्शनस्य इत्रूप
ते शब्दोनेनेति दर्शनमुच्चारणं तस्य परार्थत्वात् अर्थप्रत्यायनार्थत्वात् उच्चरितमात्रो विनश्यति चेच्छब्दः अन्योन्यार्थावगम्य
र्थं नोच्चार्येत तस्यागृहीतसंगतिकत्वात्। गोपदत्वजातौ संगतिरूपपद्यत इति चेत्। न। मृदादिना घटादिव्यक्तिवत् नित्ये
विभुभिर्वर्णैर्व्युक्त्यानभासनभयेन व्यक्तिभेदाभावे व्योमत्वादिवत् व्यक्तिअभेदरूपजातिबाधकग्रस्ततया गोपदत्वा
दिजातेरनुपपत्तेः॥ उक्तं च भट्टपादैः॥ विच्छिन्नपतत्व्यंगेष्वनित्येष्वपि गतेनापि॥ व्यतिरिक्तपदार्थं सोऽवर्णे नात्रोपप
श्री ४ यत इत्युच्चारणमात्राविनष्टत्वे तु शब्दस्योपपद्यतेऽर्थप्रत्ययः भिन्नत्वेपि सादृश्यादर्थप्रतीतौ गालामालादावपि प्रसंगाद् श्री ४
वर्णाः तस्मान्नित्यः शब्दः॥ अतोऽपि नित्य इत्याह॥ सर्वत्र यौगपद्यादिति॥ गोशब्दात् सर्वगवीषु प्रत्ययो जायते अतो जा
तिवचनोऽयं। कथं चानेकगोत्वपृथिवीत्वद्रव्यत्वादिजातिसंपिण्डिते गोपिण्डे संबंधग्रहणाय विना शब्दे गोत्वादिनिकृष्येत
शब्दनित्यत्वे च व्यक्तिवाच्यत्वमेव स्यात् व्यक्तित्वं च यद्यपि तिरकास्पी जात्या संबंधग्रहणमुपपद्यते तस्मादपि नित्यः॥
इतोऽपि नित्यत्वमाह॥ संख्याभावादिति॥ भिन्नत्वे शब्दस्य अष्टौ गोशब्दा इति संख्याया भाव्यं सा च नास्ति अष्टकृत्वो गोश
ब्दमुच्चारयतीति हि प्रयुञ्जते। अतः प्रत्यभिज्ञानादेकत्वे शब्दस्य न च सादृश्यात् प्रत्यभिज्ञानं सद्वत्व प्रयोगात् कृत्व
सुचोऽनुपपत्तेश्च बुद्धिकर्मणो निविकन्नस्यादिति चेत्। न। तज्जन्मदस्य अप्रामाणिकत्वात् इह तु तस्यानित्यत्वात्। तस्मा
न्नित्यः शब्दः॥ इतोऽपि नित्य इत्याह॥ अनपेक्षत्वादिति॥ यद्धि नवगतोऽस्ति घटादि तद्ध्वर्तमानदृष्टायो तं तु तत्संयो
गादिकारणापेक्षजन्मेत्यध्यवसायन्नमतत्। तेन शब्दस्य संयोगनाश शब्दविनश्यतीत्यनित्यतयाध्यवसीयते शब्द
स्त्वेवमपि तत्संयोगादिकारणानपेक्षत्वात् असंभाविनाशो नित्य एवेति युक्तमुत्पश्यामः॥ ॥ननु वायुकारणक

शब्दं वायुनापद्यते। शब्दत्वामिति शिक्षावचनात्। अध्यवस्याम॥ अतः कोऽर्थ जन्मवतो नित्यत्वं तत्राह। प्रेक्षाभावात्तु योगस्येति प्र
कृष्टा प्रत्याहृत्ता ईक्षा प्रेक्षा प्रत्यभिज्ञेति यावत् वायवीयावयवसंयोगस्य अन्वयस्य कार्ये शब्दे प्रत्यभिज्ञाभावात् ननु कारण
वर्णं शब्दस्येत्यर्थः तत्त्वादीन् पदादावनुगतान् प्रत्यभिज्ञानीमः नचैवं वायवीया॥ अवयवा॥ स्यन्नु नि न प्रत्यभिज्ञायते तद
न्वयव्यतिरेकानुविधायित्वं तु शब्दस्य व्यञ्जकतया प्रागेव निर्णयार्थं। तस्माच्छब्दो नित्य॥ शब्द इति॥ इतोऽपि नित्य इत्याह॥ ॥
लिंगादर्शनाच्चेति॥ अन्यपरं वाक्यं अन्यार्थद्योतकं लिंगमित्युच्यते। तदत्र शब्दो नित्यत्वे हूपते वाचा विरूप नित्यये
त्ति। रूपयतीति रूपं वाचकं कर्त्ता अत्राह तत्त्वेन नित्या वेदवाक्ये विरूप नित्यात्तयोरित्यर्थः अभिप्रायमरूपम्। अतोऽत्रालिंगी
तद्धर्मात् नित्यः शब्दः॥ अतोऽमानपत्राह त्याकृतकत्वे पद ध्वनेः नित्यत्वमाना। भावाच्च नित्यः शब्द इति स्थितं॥७॥२३॥ ॥
इति शब्दाधिकरणं॥ ॥७॥ ननु भवतु पदरूपः शब्दो नित्यः। तथाहि न चोदनालक्षणो धर्मः चोदनानाम प्रवर्त्तकं वाक्यं
तदर्थः धर्मः। नह्यग्निहोत्रादिपदात् धर्ममवगच्छामः अपितु वाक्यात्। तच्च पौरुषेयं वाक्यत्वात् कालिदासादिवाक्य
वत्। पौरुषेयत्वे च भ्रान्त्यादिसंभवादप्रामाण्यं चोदनाया इत्याशयेन शंकते॥ उत्पत्तौ वा वचनाः स्युरर्थस्यातन्निमि
त्तत्वादिति। वात्राहः सिद्धान्तपक्षव्यावृत्त्यर्थः। उत्पत्तौ औत्पत्तिकत्वे नित्यत्वे शब्दार्थ तत्संबन्धानां स्युरपि न चोदना
याः प्रामाण्यं यतोऽत्र पदात्मकाः शब्दाः वाक्यार्थस्य अवचनाः अवाचकाः ते हि सामान्यमभिदधति वाक्यार्थश्च वि
शेष॥ ॥ ननु पदाभिहिताः पदार्थाः बोधयन्तु वाक्यार्थमिति चेन्न। अर्थस्य पदार्थस्य ज्ञातावैकवचनं अतन्निमि
त्तत्वात्। वाक्यार्थबोधनिमित्तलाभावात् पदार्थाश्चेत् वाक्यार्थं बोधयन्तीति। तदा अन्त्या इत्येव वाक्यार्थस्यस्या
त्। अतः पदसमुदायो वाक्यं तदर्थो वाक्यार्थ इति वक्तव्यं। ननु समुदायस्तद्ध्वनि निरू स्त्वत्तास्ति अतो वा
क्यार्थप्रत्ययो व्यामोहः॥ ॥ अथ विशिष्टानुपूर्वीकाणि पदान्येव वाक्यं तर्हि असावानुपूर्वी लौकिकवाक्य
वत् वैदिकमपि पौरुषेयमिति कथं प्रमाणं स्यात्। तस्मान्न चोदनालक्षणो धर्म इति॥२४॥ अत्रोच्यते॥ तद्भूतानां
क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वादिति। तद्भूत पदार्थेषु भूतानां वृत्तानां पदानां क्रियार्थेन पदेन समा

म्नायः समुच्चारणे कृतः अर्थस्य पदार्थस्य तन्निमित्तत्वात् वाक्यार्थप्रत्ययः निमित्तत्वात् पदानि तावत् स्वार्थानभि
दधति पश्चात्ते पदार्था आकाङ्क्षासन्निधियोग्यतावन्तो नवाक्यार्थप्रतिनिमित्तत्वात्॥ ॥उक्तं च भट्टपादैः॥ ॥पाकेन्ना
लेवकाष्ठानी पदार्थप्रतिपादनमिति॥२५॥ यदुक्तं लौकिकवाक्यवत् वेदस्यानुपूर्व्याः पौ रुषेयत्वमिति तत्राह
लोके सन्नियमात् प्रयोगसन्निकर्षः स्यादिति॥ लोके सन्निकर्षात् प्रमाणान्तरसंबंधात् प्रयोग सन्नियमः पुरुषाधी
नप्रयोगव्यवस्था लोके इत्युक्तः स्यात् नतु तथेति व्यवहितविप्रकर्षेणानुषङ्गेणस्त्रव्याख्येयं उक्तं च प्रथमसूत्रे भ
ट्टपादैः॥ पदेनव्यवधानं तु लोके सन्नियमादिति॥ इतियुक्तं प्रमाणान्तरगोचरार्थविषयत्वात् पौरुषेयत्वं लौकिक
वाक्येषु वैदिके त्वतीन्द्रियार्थविषयत्वात् पदवर्णानुपूर्वीवत् पदानुपूर्व्या इदं प्रथमतया तावन्नियतत्वात्
श्री ४ नपौरुषेयत्वं न्यायवकाशः एतेन लौकिकवाक्यपौरुषेयत्वस्य प्रमाणान्तरगोचरार्थविषयत्वप्रयुक्तत्वात् उप
१० क्षेत्र विपक्षबाधकानुकूलतर्काभावात् वाक्यत्वहेतोर्न प्रयोजकत्वमुन्नेयं। अतो मानान्तरागम्यगोचरा वेदचो श्री ४ ४
१ अ दना पुंऽन्यतमानित्यामानमेवेति सिद्धं॥२६॥ ॥इति वाक्याधिकरणं॥ ॥७॥ ॥एवं तावद् पौरुषेयतया नित्यत्वस १०
मर्थनेन चोदना गतः पदवाक्याश्रय आक्षेपः प्रत्यक्षोपि इदानीमन्यथा प्रत्यवतिष्ठते॥ वेदांश्चैके सन्निकर्षं पुरु
षाख्याः इति॥ वस्त्वर्थः। एकेवादिनः सन्निकर्षं सन्निकृष्टकालत्वं लक्षीकृत्य कृतकान् वेदान् मन्यन्ते यतस्ते पुरु
षाख्याः पुरुषेण आख्यायन्ते समाख्यायन्ते काठकं माठकं कालापकं पैप्पलादमिति कृतेग्रंथ इति हि तत्र हि त
मर्थं समन्वेति। कठादिनाकृतो ग्रंथः काठकादिः अतः समाख्यातः पौरुषेयत्वं वेदानां तत्कथमपौरुषेयत्व चोद
५ णी नाः तत्सम इत्यानूर्चे दानी॥२७॥ अतोप्यनित्या वेदा इत्याह॥ ॥अनित्यसंयोगादिति॥ ॥बबरः प्रावाहणि
रकामयत। कुसुरुबिन्द औद्दालकिरकामयत॥ जनमेजयः पारीक्षित इत्यादौ जननमरणवतोऽनित्या अ
र्था दृश्यन्ते अत एभ्यः प्राक् ग्रंथा नासन्निति पश्यामः। तस्मान्न चोदना धर्मे प्रमाणमिति॥२८॥ ॥अत्रानिधीय
ते॥ ॥उक्तं तु शब्दपूर्वत्वमिति॥ उक्तमस्माभिरनादिपरंपरागताध्यापकसमुच्चारणपूर्वत्वमध्येतृणामौत्प

त्रिकस्यादौ अतोऽयं किंचिदेतत् ॥ ननु तथाप्याक्षेपः परिहर्त्तव्यः । तत्राह । आख्याप्रवचनादिति ॥ महताप्र
बंधेन प्रतिपादिते वेदनित्यत्वे आख्यासमाख्याप्रवचनात् अध्यापनादुपपत्स्यते कठादिना प्रोक्तोऽध्यापि
तो ग्रंथः काठकादिरिति ॥ स्मनेति च तेन प्रोक्तमिति । असाधारण्येन व्यपदेशः । पनः श्रुताः कूपप कुंडम
गस्त्य कुंडमित्यादौ दृष्टाः तस्मादसदेतत् ॥ ३० ॥ यत्पुनः कालनमुक्तं अनित्यत्वे बबरइत्यादि तत्राह । प
रं तु श्रुतिसामान्यमात्रमिति । श्रुतेः शब्दस्य समानत्वमात्रमत्र नत्वर्थः समानः नहि प्रवहणस्यापत्यं
प्रावाहणिः अपितु प्रकृष्टं वहनस्य कर्त्ता बबरशब्दानुकृतिरूपायी वायुरेवावयवव्युत्पत्त्या प्रावाहणिरित्युच्य
ते न समुदायार्थं रूपं किंचिदपि पश्यामः एवमेवौद्दालकि प्रभृतीनामपि श्रुतिसामान्यमुन्नेयं ॥ यद्यपि — नो
द्यतुल्लिंगानि नानारूपाणि पर्ययोद्भवं ते तानि तान्येव तथा भावायुगादिषु इत्यनेन न्यायेन प्रतियुगमनु
वर्त्त मानाः बबरादयः प्रवाहनित्यतया चेद्रूपादिवत् वैदिकपदगोचराः संतो नैव वेदस्यानित्य ।8
त्वमापादयंतीति न किंचिद्दुष्यति ॥ ३१ ॥ ननु जरद्गवः कंबलपादुकाभ्यामिति वत् वनस्पतयः सत्र
मासत सर्पाः सत्रमासत गावो वा एतत्सत्रमासतेत्येवंरूपाः प्रमत्तबालवाक्यसदृशाः शब्दाः परि
दृश्यमाना वेदविभागाः कथमिव कृत्स्नस्य वेदस्य प्रामाण्यं नापादयेयुः तत्राह ॥ कृते वा विनियोगः
स्यात् कर्मणः संबंधादिति ॥ वा शब्दः शंकाव्यावृत्त्यर्थः । कृते कर्मणि सत्राख्ये शब्दसामर्थ्येन विनि
योगो विधिर्वनस्पतय इत्यादिः स्यात् । कुतः कर्मणः अंगत्रयेण तस्य सत्रभावनाख्यस्य ज्योतिष्टो
मेन यज्ञेनेत्यादि कर्मणा संबंधात् न नाव दत्तुपपन्नार्थवाक्यसाम्येनानुपपन्नार्थस्यापि वाक्यसमूह

पूर्वभाग॥ (पा॥)
पत्रा॥ ॥ पंक्ति॥
आमाचतुःस्तक

मीमांसा न्याय

चूडामणि

स्याप्रामाण्यमापादयितुं युक्तं, अतिप्रसंगात् अथापि विप्रलंभकप्रणीतत्वशंकया तदापद्ये
ततन्मायादयेयाः। यतः सत्रमत्रस्तूयते वनस्पतयोपि ऊडाः सत्रमासत किमुत विद्वांसो ब्रा
ह्मणादय इति। अतः काठकादिसमाख्येह प्रवक्तृत्व निबंधना॥ न वेदपौरुषेयत्वनिमि
त्तमिति गम्यते। तत्सिद्धमेतत् चोदनालक्षणोर्थो धर्म इति॥ ३२॥॥ तदेवं अज्ञानसंदेह विप
र्यया एवं त्रेधाऽप्रमाणत्वमपास्य वेदे॥ प्रामाण्यमस्याप्युरुकानि कारव्येस युक्तिसंघैरिह त
श्री। ४ र्कपादे॥ ८७॥ ॥ इति श्री तंत्रचूडामणौ प्रथमा ध्यायस्य प्रथमः पादः॥ ॥ ८०॥ ॥श्रीरस्तु॥ ॥ श्री। ४
११ ११ १४

तंत्रचूडामनी
५००

६३२२
११ पत्र

५